# संस्कृतवार्ता:

दिनाङ्क :   24.09.2025                                                        सायम्  - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- केन्द्रीय-मन्त्रिमण्डलेन अद्य पञ्चनवति-सहस्रकोटिरुप्यकाणां षड्प्रस्तावेभ्यः अनुमतिः प्रदत्ता।
- केन्द्रीय-मन्त्रिमण्डलेन अद्य भारतस्य जलपोत-निर्माणं सामुद्रिक-पारिस्थितिकीतन्त्रञ्च पुनर्जीवयितुं पञ्चविंशत्युत्तर-सप्तशताधिक-एकोनसप्तति-कोटिरुप्यकाणां आर्थिक-सम्पुटः अनुमोदितः।
- विदेशमन्त्रिणा डॉ॰एस्.जयशङ्करेण न्यूयॉर्क–नगरे वैश्विकदक्षिणदेशानां उच्चस्तरीयसभायाः आध्यक्षं विहितम्। सहैव विद्यमान-मञ्चानां सदुपयोगाय अपि आह्वानं कृतम्।
- युव-क्रीडा-मन्त्रालयेन षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य एशियाई-क्रीडा-स्पर्धायां अन्य च स्पर्धासु क्रीडकानां दलानां च कृते चयन-मानदण्डा: प्रकाशिता:।
- पुरुष-विंशति-प्रति-विंशतिःएशिया-चषक-प्रतिस्पर्धायां दुबई-नगरस्य अन्ताराष्ट्रीय - क्रिकेट-क्रीडाङ्गणे अद्य भारतदलं बांग्लादेशेन सह स्पर्धिष्यति।

---------------------------------------------

<u>सीसीईए-मन्त्रिमण्डलम्</u>

केन्द्रीय-मन्त्रिमण्डलेन अद्य पञ्चनवति-सहस्रकोटिरुप्यकाणां षड्प्रस्तावेभ्यः अनुमतिः प्रदत्ता। केन्द्रीय-मन्त्रिमण्डलेन अद्य भारतस्य जलपोत-निर्माणं सामुद्रिक-पारिस्थितिकीतन्त्रञ्च पुनर्जीवयितुं पञ्चविंशत्युत्तर-सप्तशताधिक-एकोनसप्तति-कोटिरुप्यकाणां आर्थिक-सम्पुटः अनुमोदितः। नवदिल्ल्यां सञ्चारमाध्यमिकान् विज्ञापयन् केन्द्रीयसूचना–प्रसारणमन्त्री अश्विनिवैष्णवः प्रोक्तवान् यत् अद्यतनीये मन्त्रिमण्डलीयोपवेशने स्वीकृताः निर्णयाः विविध-क्षेत्राणि व्याप्नुवन्ति।

श्रीवैष्णवेन प्रोक्तं यत् भारतस्य समुद्रिक-पारिस्थितिकीतन्त्रं पुनर्जीवयितुं अयं सम्पुटः चतुस्स्तम्भात्मकं दृष्टिकोणं प्रकाशयति। तेषु स्वदेशीयक्षमतायाः दृढीकरणम्, दीर्घकालिकवित्तपोषणे परिष्कारः, ग्रीनफ़ील्ड–ब्राउनफ़ील्डक्षेत्रयोः विकासः इत्येते विषयाः अन्तर्भवन्ति। सर्वकारेण दश-दशमलव-एकनवति-लक्ष-रेलकर्मचारिभ्यः पञ्चषष्ट्यधिक-ष्टशतोत्तर- कोट्यधिक-रूप्यतोऽप्यधिकं अष्टसप्तति-दिवसाधारितं उत्पादकता–सहवेतनमपि अनुमोदितम्। मन्त्रिमण्डलेन देशे स्नातक-चिकित्सा शिक्षाक्षमतायाः विस्ताराय अपि सहमतिः प्रकटिता।

---------------------------------------------

<u>जयशङ्कर-उपवेशनम्</u>

विदेशमन्त्रिणा डॉ॰एस्.जयशङ्करेण न्यूयॉर्क–नगरे वैश्विकदक्षिणदेशानां उच्चस्तरीयसभायाः आध्यक्षं विहितम्। वस्तुतः संयुक्तराष्ट्र-महासभायाः इदं अशीतितमं सत्रमासीत्। अत्रावसरे जयशङ्करेण वैश्विक-दक्षिणदेशेषु परस्परं परामर्शं दृढीकर्तुं, ऐक्यञ्च प्रवर्तयितुं विद्यमान-मञ्चानां सदुपयोगाय आह्वानं कृतम्। तेन संयुक्तराष्ट्रे समग्रे बहुपक्षवादे च परिष्कारार्थं कश्चन प्रस्तावोऽपि उपस्थापितः। एकस्मिन् सामाजिक-सञ्जालीय-सन्देशे डॉ॰ जयशङ्करः प्रोक्तवान् यत् सम्मेलनावधौ सः सिङ्गापुरस्य विदेशमन्त्रिणा विवियन–बालकृष्णन् सेंट–लूसियायाः विदेशमन्त्रिणा अल्वा–बैप्टिस्ट, सोमालियायाः विदेशमन्त्रिणा अब्दिसलाम्-अली इत्येतैः सह मिलितवान्। स्वीयेन डच–समकक्षेण डेविड-वैन–वील इत्यनेन सहापि असौ संवादं साधितवान्। तत्र तावत् यूरोपीय–रणनीतिकस्थितेः विषये भारतस्य दृष्टिकोणस्य च विषये गम्भीरचर्चा समभवत्।

---------------------------------------------

<u>प्रधानमन्त्री-आयुष्मान</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य भारतस्य स्वास्थ्य-परिवर्तनस्य वर्धमान-मान्यता राष्ट्रीय-विकासस्य मुख्यस्तम्भरूपेण प्रकाशिता। श्रीमोदिना प्रसिद्ध-हृद्-रोग-विशेषज्ञेण डॉ. देवी-प्रसाद-शेट्टीवर्येण लिखित: लेख: "Tying health to productivity” इत्येष: प्रकाशित:। तेन प्रोक्तं यत्

आयुष्मान-भारत-पोषण-अभियानं स्वच्छ-भारतं इत्येते प्रयासा: केवलं सार्वजनिक-स्वास्थ्य-परिणामानेव न परिष्कुर्वन्ति अपितु अर्थव्यवस्थां अपि दृढीकुर्वन्ति। श्रीमोदिना प्रोक्तं यत् स्वास्थ्यं अपव्यय: न भवति, अपितु निवेश:भवति। अस्य प्रभावेण शासनं समृद्धि: च वर्धते।

---------------------------------------------

<u>राष्ट्रपति-सांस्कृतिकशक्तिः</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: प्रोक्तवती यत् भारतस्य आर्थिकशक्तित्वेन वर्धमान-प्रतिष्ठया सह सांस्कृतिक-शक्तित्वेनापि भारतस्य ख्यातिः प्रसरेत्। एतदर्थं तया सबलं सामूहिकप्रयासानाम् आवश्यकता प्रतिपादिता। नवदिल्ल्यां ललितकला-अकादम्या आयोजिते चतुःषष्टितमे राष्ट्रीयकलाप्रदर्शनी-समारोहे भाषमाणा सा अवदत् यत् कला सांस्कृतिक-न्यासस्य सम्पन्नतायै संवेदनशील-समाजस्य निर्माणाय च सशक्त-साधनमस्ति। सा एतदपि प्रोक्तवती यत् भारतीयकला निरन्तरं विकसति ।

---------------------------------------------

<u>गोयल-</u>

केन्द्रीय-वाणिज्योद्योग-मन्त्रिणा पीयूषगोयलेन प्रोक्तं यत् भारतं आगामिपञ्चवर्षेषु स्वच्छ-ऊर्जायाः विस्ताराय उत्कृष्टस्थितिं समासादयति। न्यूयॉर्क-नगरे आयोजितं यूएस-इंडिया-स्ट्रैटेजिक पार्टनरशिप-फोरम इत्येतं सम्बोधयता श्रीगोयलेन प्रोक्तं यत् सर्वकारः स्वच्छ-ऊर्जाक्षमतां पञ्चाशत्यधिक-द्विशतं गीगावाटपरिमितात् पञ्चाशत्यधिक-पञ्चशतं गीगावाटमितं यावत् वृद्धिं कर्तुम् इच्छति। तेन प्रोक्तं यत् भारतदेश: आगामि-वर्षेषु ऊर्जा-उत्पादनानां व्यापारं अमेरिकादेशेन सह वर्धयितुं इच्छति। श्रीगोयलः उक्तवान् यत् भारत-अमेरिकादेशौ नाभिकीय-ऊर्जा-क्षेत्रे सहकारि-योजनायाः निर्माणं कर्तुं शक्नुवन्ति।

---------------------------------------------

<u>सघोषविक्रय:</u>

प्रधानमन्त्रिणा नरेन्द्र-मोदिना नागरिकाः उत्साहपूर्वकं ऑनलाइन-सघोषविक्रये भागग्रहणाय प्रेरिताः । तत्र तावत् तेन विविध-कार्यक्रमेषु सम्प्राप्ताः उपहाराः प्रदर्शिताः सन्ति । सामाजिक-

सञ्चालीय-सन्देशे प्रधानमन्त्रिणा प्रोक्तं यत् सघोषविक्रये प्राप्तराशिः “नमामि गंगे” योजनायाम् योगदानं करिष्यति । अस्याः योजनायाः उद्देश्यं गङ्गानद्यः संरक्षणं पुनरुद्धारं चास्ति।

----------------------------------------------

**निर्वाचन-आयोगः**

निर्वाचन-आयोगेन अद्य जम्मू कश्मीरराज्यतः राज्यसभायाः चत्वारि आसनानां द्विवार्षिक-निर्वाचनं घोषितम्। एते सर्वे आसनाः एकविंश्यधिक-द्विसहस्रतं वर्षस्य फ़रवरी मासतः रिक्ताः आसन्। आयोगेन पंजाबराज्यात् राज्यसभायाः एका आसनायाः उपचुनावस्यापि घोषणा कृता। अयं आसनः अस्मिन वर्षे जुलाईमासे संजीव अरोड़ायाः त्यागपत्रस्य पश्चात् रिक्तः अभवत्। निर्वाचन-सूचना आगामी-मासस्य षड् दिनांके प्रकाशितव्ये। मतदानं मतगणनं च अक्टूबरमासस्य चतुर्विंशतिः दिनांके क्रियते।

----------------------------------------------

**टाइफून्**

सुपरटाइफून् रागासा इत्यनेन ताइवान-हॉगकॉङ्ग-फिलीपीन्स- दक्षिणचीनदेशेषु महती क्षतिः दुरापादिता। अस्माद्धेतोः ताइवानदेशे चतुर्दशजनाः मृताः अष्टादशजनाः व्रणिताः अभवन् । प्रचण्डवृष्ट्या ताइवान-देशस्य पूर्वी-उत्तरी-दक्षिण-तटीय क्षेत्राणि प्रभावितानि। अनेन लीपीन्स-देशेऽपि च चत्वारः जनाः मृताः। दक्षिणचीनदेशे च जन-जीवनं बाधितम्। चीनदेशस्य ग्वांगडोंग प्रान्ते विद्यालयाः, उत्पादनम्, सार्वजनिकपरिवहनम् व्यवसायिक-कार्याणि च अवरोहितानि । चीनदेशस्य ऋतु-विभागेन नारङ्ग-सञ्चेतना प्रसारिता यतः टाइफून इत्यनेन तीव्रवायुभिः सह तीव्रवृष्टेः संभावनाऽपि वर्तते। रागासा- हांगकांग-नगरात् दूरं गच्छति, किन्तु नगरं साम्प्रतमपि झञ्झावातेन प्रभावितं दृश्यते।

----------------------------------------------

**एशिया-क्रीडा**

युव-क्रीडा-मन्त्रालयेन षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य एशियाई-क्रीडा-स्पर्धायां अन्य च स्पर्धासु क्रीडकानां दलानां च कृते चयन-मानदण्डाः प्रकाशिताः। अयं निर्णयः पारदर्शी-

न्याययुक्तस्य आधारस्य निर्माणाय गृहीत:। येन केवलं ते एव क्रीडका: चिता: स्यु: येषु जयस्य वास्तविक-संभावना वर्तते। एते मानदण्डा: अन्ताराष्ट्रिय-स्पर्धासु क्रियान्विता: न भविष्यन्ति।

-----------------------------------------------

<u>क्रिकेट</u>

पुरुष-विंशति-प्रति-विंशतिः एशिया-चषक-प्रतिस्पर्धायां दुबई-नगरस्य अन्ताराष्ट्रीय -क्रिकेट-क्रीडाङ्गणे अद्य भारतदलं बांग्लादेशेन सह स्पर्धिष्यति। एषा स्पर्धा अद्य रात्रौ अष्टवादने आरप्स्यते।अद्य विजयी दलं अन्तिम-स्पर्धायां स्वस्थानं सुनिश्चेष्यति ।

।। इति वार्ता: ।।